N.A.

Mathuri pakshata

माथुरी पक्षता

Sanskrit

Paper - Handwritten

N.A. (Very old)

15 Folio

14.8" X 4.8"

Complete

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

१०४१ - नं ६७

N-127
F-15

माधुरी पद्मता

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

मा॰प॰ अनुमानपरिच्छेदरहस्येउपाधिवादरहस्येउपाधिंनिरूप्यपक्षतांनिरूपयितुंशिष्यावधानायप्रतिजानीते। व्याप्त्यनंतरमिति॥ व्याप्तिनिरूपणानंत
१ रमित्यर्थः॥ क्वचित्तथैवपाठः॥पक्षधर्मता॥पक्षधर्मः॥पक्षपदस्यशास्त्रकारीयपरिभाषाविषयतावच्छेदकोअनुमितिजनकोधर्मइतियावत्
५ भावार्थस्याविवक्षितत्वात्॥एतेनव्याप्तिपक्षधर्मतयोरनुमित्यात्मकैककार्यानुकूलत्वमेवसंगतिरितिसूचितं॥अनुकूलत्वंचकारणकारण-
तावच्छेदकसाधारणंप्रयोजकत्वं॥तच्चकारणतावच्छेदकव्याप्तत्वान्यसिद्धिचतुष्टयराहित्यसतिनियतपूर्ववर्तित्वं।तेनव्याप्तेरनुमित्यजनकत्वे पा॰ ४
पिनक्षतिः॥विषयितासंबंधेनपरामर्शनिष्ठकारणतावच्छेदकतयापद्योक्तप्रयोजकत्वस्यतत्रसत्वात्तत्रचातीतानागतव्याप्तिपरामर्शादनुमि
तिः नियतपूर्ववर्तित्वघटितयथोक्तप्रयोजकत्वमपितत्रनास्तीतिवाच्यं॥व्याप्तिसामान्यतादृशप्रयोजकत्वस्यासत्वेपिसत्तात्वादित्यादौनि १
त्यसंबंधघटितव्याप्तिःतत्संभावनैवहिनिखिलव्याप्त्यासमंसंगतिरपेक्षिता॥वस्तुतस्तुव्याप्तिप्रयोज्यानुमितिजनकत्वमेवपक्षतायांव्याप्त्येः

(कृवानन्द ५)

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

संगतिः॥ व्याप्तिप्रयोज्यत्वं च व्याप्त्यवच्छिन्नकारणताप्रतियोगिककार्यताश्रयत्वं। उपाधिपक्षतयोरप्युद्भावनद्वारा विजयलक्षणैककार्यानु
कूलत्वमेव संगतिः। यथा परकीयहेतावुपाध्युद्भावने विजयः तथा स्वीयहेतौ पक्षतोद्भावनेपि विजयादिति भावः तत्रेति तच्छब्देन निरूपणप
रः विषयत्वं सप्तम्यर्थः अन्वयश्चास्य पक्षत्वमित्यनेन। तथा च निरूपणविषयीभूतपक्षत्वमिदं नेत्यन्वयः पक्षत्वं पक्षपदपरिभाषाविषय
तावच्छेदकोनुमितिजनको धर्मः॥ एवं सर्वत्र संदिग्धसाध्यधर्मत्वमिति। संदिग्धं साध्यं येन रूपेण तत्संदिग्धसाध्यं साध्यसंदेहविशेष्य-
तावच्छेदकमिति यावत्। तादृशपक्षधर्मत्वमित्यर्थः। तथा च विशेष्यतावच्छेदकसंबंधेन साध्यसंदेहवत्त्वं पक्षत्वमिति फलितं न चैवं प ता२
क्षतायाः पक्षतावच्छेदकनिष्ठत्वमेव वक्तव्यं न तु पक्षनिष्ठत्वं इति वाच्यं अनुमितिकारणीभूतस्य पक्षपदपरिभाषाविषयतावच्छेदकधर्म-
स्यास्य पक्षपदप्रवृत्तिनिमित्तत्वाभावेन पक्षतावच्छेदकपक्षयोः सत्वासत्वे पक्षत्वविरहादनुमित्युद्देश्यत्वस्यैव पक्षपदप्रवृत्तिनिमित्त

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

मा·प·
२ त्वाभावेनपक्षतावच्छेदकपक्षयोःसत्त्वासत्त्वेपिक्षतिविरहादनुमित्युद्देश्यत्वस्यैवपक्षपदप्रवृत्तिनिमित्तत्वात्।नचतथापिसमानविशेष्य
तावच्छेदकताप्रत्यासत्त्यासाध्यसंदेहस्यानुमितिहेतुत्वेसाध्यं पक्षेनैवेतिसाध्यविशेष्यकसंदेहस्यासंग्रहइतिवाच्यं।प्रसिद्धसाध्यकानु
मितेःपक्षविशेष्यकत्वनियमेनअनुमितिसमानविशेष्यतावच्छेदकतया पक्षतावच्छेदकावच्छिन्नविशेष्यकसाध्यसंदेहस्यैवतत्रानुमि
तिहेतुत्वेनतादृशसंदेहस्यासंग्रहस्यैवोचितत्वात्।नचैवंकेवलान्वयिसाध्यकेसाध्याभावाप्रसिध्यापक्षतावच्छेदकावच्छिन्नविशेष्यकसा
ध्यसंदेहस्यासंभवादनुमितिर्नस्यादितिवाच्यं।तत्रापिखंडशःप्रसिध्याभावांतरेप्रतियोगितासंबंधेनसाध्यप्रकारकस्यसाध्यसंदेहस्यप
क्षेसंभवान्नचतथापिपृथिव्यामितरभेदइत्याद्यप्रसिद्धसाध्यविशेष्यकानुमितिस्थलेपक्षविशेष्यकसाध्यसंदेहासंभवःइतर,पृथिवी त् २
निष्ठान्योन्याभावप्रतियोगिनवेतिसंदेहस्यपक्षविशेष्यकसाध्यसंदेहत्वाभावादितिवाच्यं।साध्यविशेष्यकानुमितौसाध्यज्ञानाभाव

स्यैवपक्षतात्वात्।अतएवोक्तंकेवलसाध्यज्ञानसत्वेपिनसाध्यविशेष्यकानुमितिःकिंतुसाध्यप्रकारिकैवेतिनकाप्यनुपपत्तिःभट्टाचा
र्यास्तुसंदिग्धःसाध्यरूपोधर्मोयस्यपुरुषस्यतत्वमितिबहुव्रीहिःधर्मपदंचस्वरूपकथनेनतथाचसमवायसंबंधेनसाध्यसंदेहवत्वंपक्षत्व
मित्यर्थःअनुमितिजनकस्यास्यपक्षपदस्यप्रवृत्तिनिमित्तत्वाभावेनपक्षानिष्टत्वेपिक्षतिविरहात्साध्यसंदेहपदंचपक्षतावच्छेदकावा
च्छिन्नविशेष्यकसाध्यतावच्छेदकसंबंधसंसर्गकसाध्यतावच्छेदकावच्छिन्नप्रकारकनिर्णयनिवर्तनीयसंशयपरंतेनपक्षःसाध्य
वान्नवासाध्यंपक्षवृत्तिनवासाध्यंपक्षेनवासाध्यंपक्षनिष्ठाभावप्रतियोगिनवेत्यादीनांसर्वेषांसंदेहानामप्रसिद्धसाध्यकस्थलेइत
रत्पृथिवीनिष्ठान्योन्याभावप्रतियोगिनवेत्यादिसाध्यप्रतियोगिविशेष्यकसंदेहानांचसंग्रहः।संदेहपक्षतावादिनयेएतदन्यतमसंदे
हादेवानुमितिस्वीकारान्नचसाध्यंपक्षेनवेत्यादिसंशयेनतादृशनिर्णयनिवर्त्यैःसमानप्रकारकनिर्णयस्यैवप्रतिबंधकत्वादितिकु

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

नस्तेषां संग्रह इति वाच्यं। संदेहपक्षतावादिनां प्राचां मते भिन्नप्रकारकनिर्णयस्य यदि स्यापि प्रतिबंधकत्वात् साध्यतावच्छेदकसंबंध
२ संसर्गकेत्युपादानात् साध्यतावच्छेदकसंबंधेन निर्णये दशायां संबंधांतरेण संदेहसत्वेपि न पक्षत्वं। तादृशनिर्णयनिवर्तनीयत्वं च ता
दृशनिर्णयत्वावच्छिन्नप्रतिबंधकतानिरूपितप्रतिबध्यत्वं तेन पर्वतो वन्हिमान् घटवांश्चेति निर्णयनिवर्तनीयस्य पर्वतो घटवान्नवे
ति संशयस्य पर्वतो वन्हिमान् वन्हेरूपवांश्चेति समूहालंबननिर्णयनिवर्तनीयस्य वन्हेरूपवान्नवेति संदेहस्य वा पर्वतो वन्हिमानि
त्यनुमितौ न पक्षतात्वं प्रतिबध्यत्वं च पक्षतावच्छेदकाघटकतया यासाध्यतावच्छेदकविशिष्टविषयतातद्व्याप्यं ग्राह्यं। तेन पर्वतो व
न्हिमान् व्याप्यधूमवानित्यनुमितौ पर्वतो वन्ह्यभावव्याप्यजलत्ववानित्याद्यनुमितौ पर्वतो वन्हिमान्नवेति संशयस्य न पक्षतात्वं। वन्हिव्या ३
प्यधूमकालीनः पर्वतो वन्हिव्याप्यधूमवानित्याद्यनुमितौ वन्हिव्याप्यधूमकालीनः पर्वतो वन्हिमान्नवेति संशयस्य पक्षतात्ववारणाय

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

च
पक्षतावच्छेदकत्वाघटकत्वेनानिश्चितविषयतां विशेषणं संशयत्वेनोपादाने तु बाधनिर्णयस्यापि पक्षविशेष्यकसाध्यनिर्णयप्रतिबन्धकस्य पक्ष-
तात्ववारणाय न च बाधनिश्चयस्य पक्षतात्वेऽपि सामान्यतो विशिष्टबुद्धिमात्रं प्रतिबाधनिर्णयस्य प्रतिबन्धकत्वादेव न तत्सत्त्वेऽनुमित्यभावोप
त्व पत्तिरेवेति वाच्यं बाधनिश्चये पक्षताव्यवहाराभावात् संदिग्धाप्रामाण्यकबाधनिश्चयसत्त्वेऽपि सिद्ध्यात्मकपरामर्शादनुमितित्यापत्तेश्च
॥ संशयपक्षतावादिनां अनुमितौ सिद्धेः प्रतिबन्धकत्वात् अगृहीताप्रामाण्यकत्वेन तादृशनिर्णयनिवर्त्यविशेषणे संदिग्धाप्रामाण्य
कसाध्यसंदेहादनुमित्यनुत्पादापत्तेः । न च सामान्यतः संशयत्वेनोपादानेऽपि वह्न्यभाववान् पर्वतो घटवांश्चेति घटादिसंदेहात्मकबाधनि
श्चयस्य पर्वतो वह्निमानित्यनुमितौ पक्षतात्वापत्तिः । साध्यसंदेहत्वेनोपादाने च नोक्तसंदेहानां संग्रह इति वाच्यं । संदेशायपदेन पक्षतावच्छे ह
दकावच्छिन्नपक्षविशेष्यकसाध्यतावच्छेदकावच्छिन्नसाध्यवत्त्वग्रहत्वावच्छिन्नविरोधिविषयकनिश्चयान्यज्ञानस्य विवक्षितत्वान्नैवं नाद
+म

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

पेन+२
वृत्ति

शनिर्णयप्रतिबध्याया: अनुमितेरपिपक्षतात्वापत्तिरितिवाच्यं संदेहपक्षतावादिनामनुमितौ सिद्धेरप्रतिबंधकत्वात् यथोक्तनिश्चयात्यय
६ त्पक्षत्वं वा संशयपदेन विवक्षणीयमतो न काप्यनुपपत्तिरित्याहुः के चित्तु संदिग्धं साध्यं उक्तजुमत्या साध्यसंदेहविशेष्यतावच्छेदकं तदेव
धर्मो यस्येति बहुव्रीहिणा साध्यसंदेहविशेष्यतावच्छेदकधर्मवत्त्वमित्यर्थः यद्वा संदिग्धं साध्यं धर्मो यस्येति जुमत्या संदिग्धसाध्यवत्त्वमित्यर्थः
प. इत्थं च पक्षपदप्रवृत्तिनिमित्तत्वस्य पक्षतावच्छेदकपर्याययोरप्रसक्त्यतिप्रसक्ती इत्याहुः ॥ तदसत् । आद्ये पर्वतत्वादिरूपेण पर्वतमहानसादेः प
या क्षत्वेन तत्रा आम्यापत्तेः । पक्षता अनुमितिजनकत्वेन अतीतानारोपक्षेनुमित्यभावापत्तेः ॥ द्वितीये हृदो वन्हिमान् धूमादित्यादौ बाधितेऽव्याप
त्तेः तत्र दृष्टान्तो साध्ये अनुमित्यभावापत्तेश्च अन्ये तु संदिग्धः साध्यरूपो धर्मो यत्र तत्त्वमित्यर्थः यद्वा संदिग्धं साध्यं यत्र तादृशो धर्मस्तत्वमनन्वयेन ६
वधर्मपदस्य रूपकथनं । ननु विवक्षितं प्रयोजनाभावादाकाशादेः पक्षत्वे साध्यत्वे चाव्याप्यापत्तेश्च । तथा च विशेष्यता संबंधेन साध्यसंदेहव

* प्र

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

श्च ८

त्वंपक्षत्वमित्याहुः तदसत् विशेष्यतासंबंधेनसाध्यसंदेहस्यानुमितिहेतुत्वेपर्वतत्वरूपेणयत्किंचित्पर्वतेसाध्यसंदेहात्तेनरूपेणपर्वतेतान

अनुमि रेऽनुदयापत्तेः। रूपांतरेणसाध्यसंदेहान्निर्णीतरूपेणानुमित्यापत्तेश्च। यद्यपिसाध्यसंदेहस्यपक्षतात्वेपक्षसाध्यसंदेहानंतरंस्मरणादिरूपःशि

म ध्यात्मकःपरामर्शःतत्रानुमित्यापत्तिः। मननादिस्थलेसाध्यनिश्चयदशायांसिषाधयिषा। अनुपमित्यनुदयापत्तिस्तथापितद्रूपस्यस्फुटतर तो

ही दोषमाह। संदेहोपीति। नविशेषणमितिनिरूपणीयत्वविशेषितः सन्समानविशेष्यतावच्छेदकतापन्नासत्याअनुमितिकारणमित्यर्थः। भट्टा

न चार्यमते। नविशेषणं। नसमवायघटितसामानाधिकरण्यप्रत्यासत्याकारणमित्यर्थः। परामर्शपूर्वमितिलिंगविशेष्यकव्याप्तिप्रकारकज्ञानोत्प

त्तिसमयइतिशेषः। लिंगदर्शनेनेति। लिंगेंद्रियसन्निकर्षेणेत्यर्थः। आदिपदात्समानकालोत्पन्नसंशयजन्यकोटितावच्छेदकप्रकारकसंस्कारा

दिसंग्रहः। तस्यनाशादिति। तस्यक्वचिन्नाशादित्यर्थः तेनपक्षतात्संशयाद्यव्यवहितोत्तरमेवस्मरणाद्यात्मकोविशिष्टपरामर्शस्तत्रपरामर्शक्षणे

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

संदेहसत्वसंभवेपिनासंगतिः।नचपरामर्शक्षणेसंदेहस्यासत्वेअनुमितिरपिनोत्पद्यतेइतिवाच्यं।अनुभवविरोधादितिभावः।नोपलक्षणमिति
५ ।ननत्पुरुषीयत्वाविशेषितः सन्निरुक्तयत्यासत्याअनुमितिजनकमित्यर्थः।भट्टाचार्यमतेचनोपलक्षणंनकालिकसामानाधिकरण्यमात्रप
प॰ त्यासत्याकारणमित्यर्थः।अव्यावर्तकतापत्तेरिति।पक्षसाध्यनिश्चयदशायां अनुमितेरव्यावर्तकतापत्तेरित्यर्थः।नैदानीमपिपुरुषांतरीयसा
४ ध्यसंदेहसंभवादितिभावः।इदमुपलक्षणं।संदिग्धसाध्यकस्थलेपरामर्शपूर्वंतदुत्पत्तिसमयेवासंदेहनाशेअनुमित्यनुदयापत्तेश्चतत्रपुरुषां
त्रि॰ तरीयसाध्यसंदेहस्याप्यभावादितिबोध्यं।साधकबाधकेति।साधकप्रमाणंपक्षेसाध्यनिश्चयः बाधकप्रमाणंपक्षेसाध्याभावनिश्चयः तदभावद
त्यर्थः।नचप्रत्ययार्थोविवक्षितस्तथासतिसर्वत्रानुमित्यात्मकसाध्यनिश्चयजनकप्रमाणस्यानुमानस्यसाध्यतद्बाधनिश्चयजनकप्रमाणस्या ५
त्समनःसंयोगादेःसत्वात्तदनुत्पत्त्यापत्तेः।नचकेवलान्वयिनिसाध्याभावनिश्चयस्याप्रसिद्ध्यातदभावस्यहेतुतासंभवतीतिवाच्यं।खंडशःप्रसिद्धा

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

ऽभावांतरे साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्वसंबंधेन साध्यभ्रमरूपस्य साध्याभाववन्निश्चयस्य तत्रापि संभवान्न च तथापि बाधकप्रमा
रू१ णपदस्य पक्षविशेष्यकसाध्याभाववन्निश्चयरूपबाधरूपत्वे साध्यपक्षनिष्ठात्यन्ताभावप्रतियोगीति बाधनिश्चयस्यासंग्रह इति वाच्यं तस्य भिन्नप्रका
रकतया अनुमित्यप्रतिबंधकत्वादसंग्रहस्यैवोचितत्वात् न सत्वेक्व चिदनुमितिरनुमाहस्य तदुत्तरं पक्षविशेष्यकसाध्याभाववन्निश्चयस्योप्पुदा त्पा
देवसंभवात् भिन्नप्रकारकस्य तस्य प्रतिबंधकत्वनयेपि साध्याभावव्याप्यवत्ता निश्चयवत्तदसंग्रहे क्षतिविरहाच्च न च प्रतिबंधकमात्रस्यैवा
भावः पक्षतायां निवेशनीयः। केचित्तु बाधकप्रमाणपदं यथोक्तबाधद्वयपरमेव न चैवमननुगमः। प्रतिबंधकाभावकूटस्य हेतुत्वेन प्रतिबंधका-
ननुगमस्यादोषत्वात् पक्षतावच्छेदकविशिष्टपक्षविशेष्यकसाध्यतावच्छेदकविशिष्टसाध्यवत्ताग्रहविरोधिनिश्चयत्वेन चानुगमनीयं बाध
निश्चयाभाववत्साध्याभावव्याप्यवत्तादिनिश्चयस्यापि पक्षतायां निवेशक्षतिविरहात् तद्ग्राह्यतायाविरोधिता निवेशनीयेत्याहुः। साधकबाधकप्र

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

माप्याभावपदेनतदुभयत्वावछिन्नप्रतियोगिताकाभावोविवक्षितःप्रत्येकधर्मावछिन्नप्रतियोगिताकाभावद्वयंवानाद्य इत्याह।उभयेति
६ तथाचकेवलसिद्धिसत्वेपिबाधाभावमादायपक्षतासत्वापत्तेरितिभावः।नांत्य इत्याह।नापीति।व्यर्थत्वादिति।अनुमितित्वावछिन्नप्रतिजन
कताकल्पनायाव्यर्थत्वादित्यर्थः।ननुह्रदोवन्हिमान् धूमादित्याद्यावनुमितिवारणायानुमितित्वावछिन्नंप्रतिजनकत्वमावश्यकमित्यत
आह।ह्रदादेःपक्षत्वेपीति।ह्रदादेर्यत्रपक्षत्वंतत्रापीत्यर्थः।आवश्यकत्वादिति।साध्यहेत्वादिविशिष्टवुद्धिसामान्यंप्रतिप्रतिबंधकत्वाद
वेत्यर्थः।हेत्वसिध्यादेरित्यादिपदात्ह्रदोधूमवान्वन्हेरित्यादौव्यभिचारव्याप्यत्वासिद्ध्यादेःपरिग्रहः।नापीतिसाधकप्रमापंपक्षेसाध्यनि
श्चयःप्रागुक्तयुक्तेः।समानविषयकेतिआत्मविशेष्यकेतरभेदप्रकारकशाब्दबोधानंतरमित्यर्थः।।मननबोधनादिति।।आत्मविविशे ६
ष्यकात्मेतरभेदसाध्यकानुमितिबोधनादिति।।प्रत्यक्षस्तदृष्टेपीति।प्रत्यक्षतोनिश्चितेपीत्यर्थः।।अनुमानदर्शनात्।।अनुमित्सयाअनुमा

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

नुनात्तदनुमानाच्चेति ॥ सिषाधयिषयात्तदनुमानं चेत्यर्थः ॥ नन्वेकलिंगावगते पि लिंगांतरेणानुमितिः सिद्धेत्यत आह ॥ मंतव्यश्चेति ॥ आ
त्मन्यात्मेतरभेदोऽनुमातव्यश्चेत्यर्थः ॥ उपपत्तिभिः बहुभिः हेतुभिः ॥ अन्यथा बहुवचनानुपपत्तेरिति भावः ॥ सिषाधयिषितेति ॥ सि
षाधयिषितः साध्यरूपो धर्मो यस्य पुरुषस्य स सिषाधयिषितसाध्यधर्मा ॥ बहुव्रीहौ धर्मस्य धर्मन्निति धर्मपदस्य धर्मान्नादेशविधानात्
॥ एवंभूतो धर्मी पुरुषः पक्षः पक्षतावानित्यर्थः ॥ धर्मपदं च स्वरूपकथनं ॥ अनुमितिजनकस्यास्य पक्षपदप्रवृत्तिनिमित्तत्वाभावे न पक्ष
नष्टत्वाभावे पि क्षतिविरहात् तथा च तत्पक्षकतत्साध्यकतत्स्वरूपीयानुमितिगोचरेच्छा तत्स्वरूपीयतत्साध्यकतत्पक्षकानुमितौ पक्षता ॥ ते
नान्यसाध्यकादिकानुमितीच्छामादाय सिद्धसाधनस्थले नातिप्रसंगः ॥ तत्स्वरूपीयत्वेनानुमितिविशेषणात् ॥ अन्यस्वरूपीयेतादृशानु
मितिविषयिणीमेतत्स्वरूपेच्छामादाय नातिप्रसंगः ॥ सामानाधिकरण्यसत्त्वासत्त्वाच्च कार्यकारणभावः ॥ तेन स्वाधिकरणतादृशेच्छामा

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

द्यायनातिप्रसंगः॥ यं च स्तुसिषाधयिषितं साध्यं धर्मो यस्य एवंभूतो धर्मी पक्ष इत्यर्थः॥ तथा च सिषाधयिषितसाध्यवत्त्वं पक्षत्वमिति फ
७ ज लितं तु: पक्षपदप्रवृत्तिनिमित्तत्वे यस्य नस्यातिरित्याह॥ तदसत्तात्पक्षे ऽनित्यात्म: गौ यितत्मात्पक्षे ऽव्याप्त्यापत्तेश्च॥ पक्षतायाः अनुमि
तिकारणत्वेनातीतादौ साध्ये अनुमित्यभावापत्तेः॥ मननस्थले पूर्वोक्तामव्याप्तिं निरस्यति तत्र यादौति॥ तथा चेत्यर्थः॥ आत्मावगमे पि॥ आत्म
न्यात्मेतरभेदनिश्चये पि॥ मननस्यानुमितिरूपात्मेतरभेदज्ञानस्य। मोक्षोपायत्वेन। मोक्षोपायत्वज्ञानेन। एतेनेच्छाकारणं संपादितं॥ सि
द्धिविशेषेति॥ अनुमितिविशेषणं। आत्मानुमानं। अन्यस्यात्मेतरभेदानुमानं॥ अत एवेति यत एव शिषाधयिषापक्षता अत एव। वाचस्पतिव
चनयोरविरोध इत्यन्वयः॥ श्रुभुत्संतेज्ञानं ति। मनस्तस्य पार्थस्याविवक्षितत्वात्। तदर्थस्याविवक्षितत्वेविरोधासंभवात्॥ तं करिणं॥ अन्यथा अविरोधं च इति
मत्यक्षपरिकलितमित्यनेन मत्यक्षकलितत्वाप्यर्थत्वानुमितिरित्युक्तं॥ नहि करिणं दृष्ट इत्यनेन प्रत्यक्षकलितार्थस्य नानुमितिरित्युक्तमि
परि

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

तिवचनद्वयस्यविरोधःस्यादितिभावः॥अविरोधमुपपादयतिअनुमित्सेति॥तद्विरहःसिषाधयिषाविरहः॥तदुपपत्तेरिति।वचनयोरुपप
त्तेरित्यर्थः॥अनुमित्सासत्वदशायांप्रत्यक्षस्यफलितमित्युक्तं॥अनुमित्साविरहदशायांनहिकरिणोत्युक्तमितिविशेषादितिभावः॥सिषाध
यिषाइति सिषाधयिषायाअपिक्वचिद्भावादितिभावः॥यत्रादौसिषाधयिषाततोव्याप्तिस्मरणं ततोव्याप्तिप्रकारकपक्षज्ञानंततःप
रामर्शःततोअनुमितिस्तत्रेतिभावः॥ननुसिषाधयिषायोग्यतापक्षतावाआसांचसिषाधयिषानाशकालेपक्षतीत्यतआह।योग्यतायाः
इति॥अनिरूपणात्निरूपयितुमशक्यत्वात्॥ननुतत्रापिपरामर्शानंतरंअनुमितीष्टसाधनताज्ञानात्सन्नरनुमितीच्छाततःपरामर्शानंतरंत
तोअनुमितिः।अथवापरामर्शानंतरंस्मरणात्मकानुमितीष्टसाधनताविषयकपरामर्शानंतरंततोअनुमित्यात्ततोअनुमितिरितिफलबलात्
कल्पनीयमित्यतआह॥सिषाधयिषेति॥अनपेक्षितेति।अनुमित्सितशब्दसंप्रदायेरित्यर्थः॥तथाचव्यतिरेकव्यभिचारेणानुमित्सैनास्याका

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

रणत्वसंभवः ॥ नचस्वपरसाधारणतत्पक्षकतत्साध्यकतत्सरूपीयानुमितीच्छामात्रं तत्सरूपीयतादृशानुमितौ पक्षतावाच्या ॥ तथाचभगवदिच्छा
८ मादायैवसर्वत्रसंगतिरितिवाच्यं ॥ तथासतिपक्षतायाः नित्यत्वेनसिद्धौसत्यामपिपक्षताप्रसंगात् ॥ ननुसिद्ध्युत्तरानुमितित्वमस्याः कार्यताव
च्छेदकमतोनोक्तस्थलेव्यतिरेकव्यभिचारः ॥ नत्रसिद्धिविरहात् ॥ सिद्ध्युत्तरानुमितित्वंचस्वसमानाधिकरणत्वेसतिस्वाव्यवहितोत्तरत्वसंबंधेनसि ना२
३ द्धिमदनुमितित्वं ॥ अव्यवहितोत्तरत्वंचक्षणद्वयसाधारणं ॥ तच्चस्वाधिकरणमुखवृत्तित्वेसतिस्ववृत्तिप्रागभावप्रतियोगित्वंअधिकरणत्वंवृत्ति
त्वद्वयंचकालिकविशेषणतयाबोध्यं ॥ तेनसिद्धिनाशोत्पत्तिक्षणोत्पन्नानुमितेरपिसंग्रहः ॥ संसारस्यानंतत्वेनप्रतिक्षणमेवांशंकुत्रचित्स्व
स्वोत्पादात्सुखस्यक्षणद्वयमात्रावस्थायितयाचनसिद्धिनाशोत्तरजातानुमितेः संग्रहः ॥ नचतथापिसिषाधयिषायाः अननुगतायाः कारण ८
त्वासंभवः ॥ यादृशयादृशेच्छासत्वेसिषाधयिषासत्वेअनुमितिः तत्तदिच्छाभावकूटत्वावच्छिन्नाभावत्वेनकारणत्वात् ॥ नचैवंसिषाधयिषासत्वेसि

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

घ्यसत्वेसिध्युत्तरानुमित्यापत्तिःतत्सामग्रीसत्वादितिवाच्यं॥सिध्युत्तरानुमितिंप्रतिसिध्येरपिहेतुत्वात्॥वस्तुतस्तुसिध्युत्तरानुमितित्वं
नकार्यतावच्छेदकंअपितुतत्तदिच्छाभावकूटत्वावच्छिन्नाभावोत्तरानुमितित्वमेवकार्यतावच्छेदकंतदवच्छिन्नंचतत्रजायतएवेति
घ२ नापत्तिः॥नचतथापिसिषाधयिषायाःअभावःसिद्धिश्चवर्तेतेतत्रसिषाधयिषाभावकूटाभावोत्तरानुमितेरनुत्पादेपिअनुमितिसामा
न्यापत्तिर्दुर्वारा॥सामान्यसामग्रीसत्वात्॥तदनुत्तरानुमितौसामग्र्यंतराकल्पनादितिवाच्यं॥तदनुत्तरानुमितावपिसिध्यभावस्यहेतु
त्वकल्पनादितिमैवं॥गुरुतरकार्यकारणभावद्वयप्रसंगात्॥सुखदुःखेच्छाद्वेषप्रवृत्तिशब्दानांसत्यानामेवक्षणद्वयमात्रस्थायित्व
याविनिगमकाभावेनसत्यानामेवोत्तरत्वानुत्तरत्वघटकत्वेनचतुर्दशकार्यकारणभावप्रसंगाच्च॥नचस्वध्वंसाधिकरणसमयध्वं
सानधिकरणत्वेसतित्वाधिकरणसमयध्वंसाधिकरणत्वमेवाव्यवहितोत्तरत्वंवक्तव्यंनतुसुखादिघटितमितिवाच्यं॥तथापिप्रत्येकं

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सुखादिघटिताव्यवहितोत्तरत्वंमात्रायमिनिगमकाभावेनपंचदशकर्म्यकारणभावापत्तेर्ईश्वरत्वाच्छरीरगौरवस्याधिकत्वादिति
९ निगर्वः॥इतिपक्षतापूर्वपक्षरहस्यं॥ ॥सिषाधयिषेति॥सिषाधयिषाविरहसहकृतंतद्विरहविशिष्टंयत्साधकमानंसाध्य
निश्चयःतदभावोस्तियस्मिन्पुरुषेसपुरुषःपक्षःपक्षपदपरिभाषाविषयतावच्छेदकानुमितिजनकधर्मवानित्यर्थः॥तथाचविशे
षणताविशेषसंबंधेनसमवायसंबंधावच्छिन्नप्रतियोगिताकनिरुक्तसाध्यनिश्चयाभाववत्त्वंअनुमितिजनकंपक्षत्वमितिफलितं॥
अनुमितिजनकस्यास्यपक्षपक्षपदप्रवृत्तिनिमित्तत्वाभावेनात्मनिष्ठत्वेपिक्षतिविरहात्।पक्षपदप्रवृत्तिनिमित्तत्वमतेपिस्वरूपसंबंधे
नतत्प्रवृत्तिनिमित्तत्वाभावात् स्वरूपसंबंधेनआत्मनिष्ठत्वेपिक्षतिविरहाच्च।तच्चाग्रेस्फुटीभविष्यति आत्मनिष्ठत्वाभिधानंचविशेष ९
णतासमवायोभयघटितसामानाधिकरण्यप्रत्यासत्त्याहेतुत्वबोधनायसाधकमानपदंतुयथाश्रुतंनसंगच्छतेतथासतिसाधकमा

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

नस्यशिद्धिजनकप्रमाणस्यावश्यमनुमितेःपूर्वंसत्वादिच्छांविनाकाप्यनुमितिर्नस्यान्नचानुमितित्वातिरिक्तसिद्धिजनकाभावोवा
च्यः।अनुमित्यनंतरमपिपक्षतापानात्।नचसाधकमानंचेत्साध्यनिश्चयस्तदासंशयोत्तरंव्याप्यदर्शनात्।साध्यप्रत्यक्षस्थलेपिप
क्षतापत्तिःसाध्यनिश्चयाभावादितिवाच्यं।इष्टत्वात्समानविषयेलौकिकप्रत्यक्षसामग्र्याःपृथक्प्रतिबंधकत्वादेवानुमित्यनु-
त्पादात्।नचैवंसंशयोत्तरंविनाप्रत्यक्षेच्छांव्याप्यदर्शनादलौकिकप्रत्यक्षंकापिनस्यादलौकिकप्रत्यक्षंप्रतिअनुमितिसामग्र्याः
प्रतिबंधकत्वादितिवाच्यं।इष्टत्वात्।वस्तुतस्तुसंशयोत्तरंव्याप्यदर्शनोत्पत्तिद्वितीयक्षणेइवतन्नैतदुत्पत्तिक्षणेपिस्थाणुत्वादिप्रत्य
क्षनिश्चयोत्पत्तौबाधकाभावेनसर्वत्रसाध्यनिश्चयसत्वान्नपक्षतायाःसंभवःविशेषदर्शनस्यसंशयोत्तरप्रत्यक्षनिश्चयहेतुता
याःबहुधानिराकृतत्वादित्येवतत्त्वंवैशिष्ट्यंचैककालावच्छेदेनैकात्मवृत्तित्वं।विशिष्टाभावस्याव्यवहितपूर्वसत्तायाःअपेक्षित-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

त्वेनकालांतरीयसिषाधयिषाविरहमादायनसिषाधयिषासत्वेसिद्धिसत्वेअनुमित्यनुदयप्रसंगः अयंचविशिष्टाभावोमननस्थलेसि
१० षाधयिषाविरहरूपविशेषणाभावात्। घनगर्जितेनमेघानुमानादौसाध्यनिश्चयरूपविशेष्याभावादेवेति नाव्याप्तिः। यत्रानुमित्सा
नंतरसाध्यविनिर्णयात्मकः परामर्शस्तत्रपक्षतासंपन्नेयंविशिष्टांतं साधकमानविशेषणंघनगर्जितेनमेघानुमानादित्यादौपक्षता
संपन्नेयंविशेष्यदलं। शिषाधयिषाचतत्साध्यविशिष्टतत्पक्षविषयकतत्प्रकारिकानुमितिविषयिणीइच्छाग्राह्यापरंकिंचिज्ज्ञा
नंजायतामितिइच्छायांअपिसिद्धिसत्वेऽनुमित्यनुदयात्। अनुमितित्वप्रकारिकायामपिप्रत्यक्षादिव्यतिरिक्तं पर्वतेवन्हिज्ञानंजायता
मितीच्छायांसिद्धिसत्वेऽनुमित्युत्पादाच्च। एवंचयादृशयादृशेच्छासत्वेसिद्धौसत्यामनुमितिस्तत्तदिच्छाभावसमुदायस्यावच्छेदकः॥ १०
साध्यनिश्चयोऽनुमितिसमानाकारोग्राह्यः तेनपाषाणमयत्वादिनापर्वतेतेजस्त्वादिनाचवन्हेःसिद्धावपिपर्वतत्वेनपर्वतेवन्हित्वेन

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

वन्त्यनुमितिरिति भावः। अत्र च सिषाधयिषाविरहकूटादीनां परस्परं विशेषणविशेष्यभावे विनिगमकाभावादनन्तकार्यकारणभावा
पत्तिर्विपरीतज्ञानादेः प्रतिबंधकताविचारावसरे अस्मत्कृतसिद्धान्तरहस्योक्तदिशा निराकरणीयानन्तु अस्य विशिष्टाभावस्यानुमिति
जनकत्वे किं मानमित्यतो अन्वयव्यतिरेकौ तत्र प्रमाणयति। तेनेति। अस्यानुमितिजनकत्वेनेत्यर्थः। न पक्षः नानुमितिमानं पक्षताव्य
तिरेकेणानुमित्यतिरेकं दर्शयित्वा अन्वयं दर्शयति। यत्रेति। साधकप्रमाणे साध्यनिश्चययोः उभयाभावः सिषाधयिषासाध्यनिश्चययोरभा
वः। तत्रेति। प्रथमे केवलविशेषणाभावकृता द्वितीये च विशेषणविशेष्योभयाभावकृता तृतीये च केवलविशेष्याभावकृता विशिष्टाभा
वः पक्षत्वं अनुमितिमत्त्वं। पक्षतनस्य पक्षपदस्याद्यन्तरभेदकत्वं। पक्षपदस्याद्यन्तरभेदसाधकत्वं। तदिदमप्रसिद्धेरिति भावः। पक्षपदप्रवृत्ति
इति। पक्षपदप्रवृत्तेरनुमित्युत्पत्तेर्निमित्तकारणत्वमित्यर्थः यद्वा पक्षपदस्य प्रवृत्तिः शक्तिः येन रूपेणेति व्युत्पत्त्या पक्षपदप्रवृत्तिः पक्ष

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

पदशक्यतावच्छेदिकानुमितिहेतुतासंबंधेनअनुमितिमत्त्वस्यैवपक्षपदशक्यतावच्छेदकत्वात्। तच्चनिमित्तकारणमित्यर्थः।
११ तथाचनेदमितरभेदसाधकमपित्वनुमितिकारणमितिभावः। अथवापक्षपदप्रवृत्तिनिमित्तंशास्त्रकारीयपक्षपदपारिभाषाविष
यतावच्छेदकोधर्मइत्यर्थः। मांचन्तुपक्षपदप्रवृत्तिनिमित्तंपक्षपदस्यशक्यतावच्छेदकमित्यर्थः। पक्षपदस्यनानार्थतयासाध्य
पक्षभेदेनसिषाधयिषासाध्यनिश्चययोर्भेदेनैपिनक्षतिः। नचैवंपर्वतोवह्निमानित्याद्यनुमितौघटादेरपिपक्षत्वव्यवहारप्रसंगइति
वाच्यंनिश्चयनिष्ठविशेष्यतासंबंधेनप्रतियोगितावच्छेदकत्वस्यशक्यतावच्छेदकतानियामकसंबंधत्वेनातिप्रसंगविरहादितिभा
वइत्याहुः अत्रप्राभाकराः पक्षस्यवदनुमितावपिपक्षतानहेतुर्गौरवात्मानाभावाच्चविषयांतरसंचारादिविरहेपरामर्शसत्त्वेचधारावा ११
हिकप्रत्यक्षवदनुमितिधाराप्युत्पद्यतएवपरंतुपरार्थानुमानएवसिद्धसाधनमर्थान्तरविधयादूषणं। नचैवंलिंगोपहितलैंगिकभा

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

ननयेऽनुमितिमनुभवसाधानुपपत्तिरनुमितिसामग्र्याबलवत्त्वेन अनुमितिधारायाएवोत्पत्स्यमानत्वादितिवाच्यं। लिंगोपहितलैंगिक
दु भानस्यैवमानाभावेनसुहृदुपराहवत्वात्। अथतथापिसिद्धेःप्रतिबंधकत्वे अविनश्यद्वस्थ्यपरामर्शादुत्पन्नानुमितिव्यक्तेयः पुनः
कथंनोत्पद्यते। नचतत्तदनुमितिव्यक्तिंप्रतितत्तत्प्रागभावव्यक्तीनांविशिष्यहेतुतयातत्तदनुमितिव्यक्तीनांविशिष्यप्रतिबंधतयावा कं
नतासांउत्पन्नानांपुनरुत्पादइतिवाच्यं। अनंतकार्यकारणभावकल्पनापेक्षयालाघवात्सिद्धेःप्रतिबंधकत्वस्यैवयुक्तत्वात्। नचसि
द्धेःप्रतिबंधकत्वेपिसिषाधयिषाविरहविशिष्टस्यतत्रविशेषणत्वावश्यकतयायत्रसिषाधयिषाततोअनुमित्यात्मकसिध्यात्मकपरा
मर्शात्तत्रचतदनुमितिव्यक्तेः पुनरुत्पादप्रसंगोदुर्वारइतिवाच्यं। सिषाधयिषापरामर्शोभयकालीनानुमितिव्यक्तिंप्रतितत्प्रागभावव्य
क्तीनांविशिष्यहेतुत्वस्यतत्तदनुमितिव्यक्तीनांविशिष्यप्रतिबंधकत्वस्यवास्माभिरभ्युपगमात्तत्रैवचसिद्धेःप्रतिबंधकत्वेकिंला

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

पक्षमितिवाच्यंसिषाधयिषाविरहकालीनाविनश्यदवस्थपरामर्शजन्यानुमितिव्यक्तिषुतत्प्रागभावव्यक्तीनांकारणत्वापुष्कलत्वादेव
३२ महत्वाभावादितिचेन्नसिद्धेःप्रतिबंधकत्वाभ्युपगमेपिसत्त्वानधिकरणेषुआत्मसुतत्तदनुमितिव्यक्तीनांउत्पादवारणायपूर्वपूर्वानुमितिव्य
क्तिसमकालभाव्यनुमितिव्यक्तीनांउत्तरोत्तरानुमितिव्यक्त्युत्पत्तिसमकालंचातीतानुमितिव्यक्तीनामुत्पादवारणायचतत्तदनुमिति
व्यक्तिषुपूर्वोत्पन्नतत्तत्परामर्शादिव्यक्तेर्विशिष्यहेतुत्वावश्यकत्वापातस्यास्वात्मनिसंबंधेनकारणत्वाभ्युपगमादेवोत्पन्नपुनरुत्पादवार
णसंभवात्।अथतथापियद्विषयविशेषपक्षकयद्विषयविशेषसाध्यकैकानुमितिव्यक्तिरेवैकैकपुरुषस्यजातानतुतत्पूर्वंतत्परतोवातत्प
क्षकतत्साध्यकःपरामर्शःअविनश्यदवस्थपरामर्शजन्यतत्पक्षकतत्साध्यकानुमितिव्यक्तीनामुत्पन्नपुनरुत्पादवारणायासाध्यत्वात् त ३२
त्पक्षकतत्साध्यकानुमितौतादृशसिद्धेःप्रतिबंधकत्वमेवकल्पयितुंयुक्तं।तत्रापितत्तदनुमितिव्यक्तिंप्रत्युत्पत्तिसंबंधेनतत्परामर्शादिव्यक्ते

विशेष्यहेतुत्वकल्पनेऽनंतकार्यकारणभावप्रसंगादिति नच स्वत्वानधिकरणेषु आत्मसु तत्तदनुमितिव्यक्तीनामुत्पादवारणाय तत्रा
पि तत्तत्परामर्शव्यक्तीनां विशिष्यहेतुत्वमावश्यकमिति वाच्यं। क्रियासंयोगकार्यकारणभावोक्तयुक्त्यासमवायिकारणव्यक्तीनामा
त्मसमवेततत्सामान्यप्रतितत्तद्व्यक्तित्वेन हेतुत्वावश्यकत्वात् स्वत्वस्वत्वानधिकरणेष्वात्मसु तत्तदनुमितिव्यक्तीनामुत्पादासंभवादिति चे
न्न तादृशविषयविशेषमानाभावादन्यथा यद्विषयविशेषप्रकारिका एकैकप्रत्यक्षव्यक्तिः स्वैकैकस्य पुरुषस्य जाता तत्तत्पूर्वं तत्परतो
वा तद्विषयविशेषयोः सन्निकर्षादिसत्त्वे विषयविशेष्ययोः विशिष्टप्रत्यक्षव्यक्तीनामुत्पत्ति पुनरुत्पादवारणाय तत्तद्विशेष्यकतद्विषयवि
शेषप्रकारकप्रत्यक्षं प्रति तद्विशेष्यकतत्प्रकारकसिद्धेः सामान्यतः प्रतिबंधकत्वप्रसंगात् तत्र विशेषणताविशेषस्यापि विशेषणते संभवात्तादृश ना
विषयविशेषानुमितौ पक्षताया हेतुत्वसिद्धावपि अन्यत्र तत्स्वातंत्र्यसिद्धेः वस्तुतस्तु प्रत्यक्षादीनां उत्पादवारणाय सामान्यतस्तादात्म्यसं पुरुजाद

पुनरु

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

का प्रति सर्ती शा

वंधेन कार्यतावछिन्नामत्तिं सत्तावछिन्नं प्रत्येवं वा विशेषणताविशेषसंबंधेन कार्यसहवर्तित्वं तया समवायसंबंधेनासत्वेन नाशे
१३ नैव वा प्रतिवंधकत्वं कुमंत्रज्ञानादिना शास्य विषयवृत्तित्वे मानाभावादधिकरणस्याविद्यमानतादशायामपि तत्र विशेषणतासं-
वंधेनाभावो वर्तत एवेति न तद्दोषतादवस्थ्यं। तथा च तत एवास्मिन्नानुमितेरपि पुनर्नीत्या दसंभवः। एतेन तत्परामर्शादिव्यक्ते
रनंतकार्यकारणभावेषूत्पत्तेः संबंधकत्वकल्पनामपेक्ष्य सिद्धेरतिरेके प्रतिबंधकत्वकल्पनैव लघीयसीत्यपि मत्युक्तमित्याहुः
२ तदसत्सिद्धेः प्रतिबंधकत्वपरामर्शनिष्ठाप्रमाण्यग्रहाभावस्य पृथगनुमितिहेतुत्वमते सिध्यात्मकपरामर्शनिष्ठतत्तद्ज्ञानत्वधर्मि
तावच्छेदककाप्रामाण्यग्रहाभावानामपि पृथक्हेतुत्वावश्यकतया महागौरवापत्तेः॥ अन्यथेदं ज्ञानं वाप्रमत्वाद्यंशे प्रमेत्यप्रा १३
माण्यज्ञानात्मकसिध्यात्मकपरामर्शादनुमित्यापत्तेः॥ न च तथापि यत्साध्यकसिद्धिकालीनपरामर्शेषु तत्तज्ज्ञानत्वधर्मितावच्छे

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

प्रा

रककामानांप्रामाण्यज्ञानंतत्रसिद्धेःप्रतिबंधकत्वेमानाभावादितिवाच्यं।। तत्रापिसिद्धेःप्रतिबंधकत्वेविनाप्यनुमित्सांस्मरणादिरूप
सिध्यात्मकपरामर्शानंतरमनुमित्यापत्तेःनचेष्टापत्तिःअनुव्यवसायविरहात् अनुव्यवसायस्यापिस्वीकारेऽनुभवापलापा
त् अन्यथाशाब्दबोधादिकंप्रत्याकांक्षादिज्ञानस्याअनुमितिप्रतिपरामर्शादेश्चगौरवात्अकारणत्वप्रसंगात् निराकांक्षादि
सुवच स्थलेपिशाब्दबोधापत्तेःतदनुव्यवसायेचेष्टापत्तेः।।विशिष्टज्ञानंप्रत्यपिबाधादेःप्रतिबंधकत्वविलोपप्रसंगाज्ज्ञानचवन्हिव्याप्यधूम-
साध्य त्वात् वान्वन्हिधूमव्याप्यवानितिवत्समूहालंबनपरामर्शानुमितिप्रवाहस्यप्राभाकरनयेअनुभवसाक्षिकत्वात्स्वन्मतेपिकुत्रचित्
२ अनुभवापलापस्तुल्यएवगौरवंपुनरतिरिक्तमितिवाच्यं। ननुस्थलविशेषेअनुमितिधारायाःप्रामाणिकत्वेसिषाधयिषावत्
त्परामर्शेष्वक्षीनामप्युत्तेजकमध्येप्रवेशस्यातिविरहात्किंचसिध्यात्मकपरामर्शस्थलेअविनश्यदवस्थपरामर्शजन्यानु

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

मा
मितिस्थलेप्रामाणिकानंतानुमितितत्प्रागभावतत्तद्ध्वंसतत्कार्यकारणभावकल्पनामपेक्ष्यलाघवात्पक्षतायाः एवहेतुत्वंकल्प
१४ ते॥ प्रत्यक्षादिस्थलेचधारावाहिकसाक्षात्कारादीनांप्रमाणसिद्धत्वादेवमपिआस्थीयते॥ नचविषयांतरसंचारविरहेभवन्मते
प्यनुमित्यनंतरमनुमितिसमानाकारमानसोपनीतभानोत्पत्तौबाधकाभावान्नातिरिक्तव्यक्तिकल्पनाप्रमाप्यनुमितस्तस्या
नाभिषिक्तत्वाद्विषयांतरसंचारादिसत्वेचततएवप्रमाप्यनुमित्यनुत्पत्तेरितिवाच्यं॥ अनुमित्युत्तरानुमितिनिर्विकल्पकव्यक्तेस्त
दनुव्यवसायव्यक्तेरेवोपनीतभानात्मिकायाउत्पत्तेर्नातिरिक्तकल्पनाभावान्निर्विकल्पकादिव्यक्तेः भवतापिस्वीकारात्इत्या
स्तांविस्तरः॥ अनुमानपरिच्छेदरहस्येपक्षताग्रंथरहस्यं॥ अनुमितिरूपैककार्यकारित्वसंगत्यातिपरामर्शादेश्चगौरवात्कारणा- १५
त्वकसंगात्निराकांक्षादिस्थलेपिशाब्दबोधादौतदनुव्यवसायेचेष्टापत्तेर्विशिष्टज्ञानंप्रत्यपिबाधादेःप्रतिबंधकत्वविलोपप्रसंगाच्च

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

नचवन्हिव्याप्यधूमवान्वन्हिव्याप्यधूमव्याप्यश्चेतिसमूहालंबनपरामर्शानंतरंपरामर्शानुमितिप्रवाहस्याभाकल्पेऽनु
भवसाक्षिकत्वात्भवन्मतेपिकुत्रचिदनुभवापलापस्फलस्यएवगौरवंपुनरतिरिच्यतइतिवाच्यं॥ननुस्थलविशेषेऽनुमिति
धारायाःप्रामाणिकत्वेसिषाधयिषावत्तत्परामर्शव्यक्तिनामप्युत्तेजकमध्येप्रवेशोस्तितिविरहात्किंचशिष्यात्मकपरामर्श
स्थलेऽविनश्यदवस्थपरामर्शजन्यानुमितिस्थलेचाप्रामाणिकानंतानुमितितत्प्रागभाववत्तत्ध्वंसतत्कार्यकारणभावकल्प
नामपेक्ष्यलाघवात्पक्षतायाएवहेतुत्वंकल्प्यते॥प्रत्यक्षादिस्थलेचधारावाहिकसाक्षात्कारादौनांप्रमाणत्सिद्धत्वाद्दोषस्वम
प्यास्मीपते॥नचविषयांतरसंचारविरहेभवन्ततेप्यनुमित्यनंतरंअनुमितिसमानाकारमानसोपनीतभावोस्तत्तौबाधकाभा
वानातिरिक्तव्यक्तिकल्पनामप्राप्यंअनुमितस्तनाभिषिक्तत्वाद्विषयांतरसंचारादसत्वेचततरानप्रामाण्यमनुमित्यनुत्पत्तेरितिवाक्यं

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

१५ अनुमित्युत्तरानुमितिनिर्विकल्पकव्यक्तेः तदनुव्यवसायव्यक्तेरेवोपनीतभानात्मिकाया उत्पत्तेरतिरिक्तकल्पनाभावान्निर्वि
कल्पकादिव्यक्तेः विनापि स्वीकारादित्यास्तां विस्तरः ॥ इति अनुमानपरिच्छेदरहस्ये पक्षतारहस्यं समाप्तम् ॥

१५

CC-0. Jangamwadi Math Collection. Digitized by eGangotri